२१

साधना-१

प्रस्तावना

मोक्षाख्यस्य परमपुरुषार्थस्य प्राप्तये अद्वैतवेदान्तस्य प्रपञ्चः। स च मोक्षः तेन लब्धव्यो यो बन्धम् अनुभवति। यश्च बन्धं नानुभवति परन्तु अन्येषां प्रचेष्टां दृष्ट्वा स्वबन्धम् अनुमिनोति सोऽपि अत्र मोक्षपथि इति ग्रहीतुं शक्यते। तथा च बन्धात् मोक्षं यावत् कानि साधनानि सन्ति, तेषां कः क्रमः वर्तते, कस्मात् साधनात् किं लब्धव्यम् इत्यादयो नैके विषया मुमुक्षोः जिज्ञास्याः सन्ति। एतेषामेव उपस्थापनाय साधनस्य पाठरूपेण प्रस्तुतिः। साधनाविषयः अति महान् सुसूक्ष्मश्च वर्तते। तस्य समग्रस्य अत्र प्रकटनं नैव सम्भवति। तथापि संक्षेपतः प्रधानविषयाः प्रस्तूयते।

समग्रस्यापि साधनस्य विभाजनं कृत्वा विविधपाठरचना कृतास्ति।

उद्देश्यानि

पाठस्यास्याध्ययनेन

- अनुबन्धान् समासेन अवगच्छेत्।
- अनुबन्धानां ज्ञानस्य आवश्यकतां बुध्यात्।
- कर्मरहस्यं जानीयात्।
- साधनायाः कारणम् अवधारयेत्।
- अधिकारिणः सम्पादनीया सम्पत्तिः स्पष्टा भवेत्।
- सम्पत्तेरर्जनाय किं साधनं केन क्रमेण कर्तव्यमिति विवेको जायेत।

२१.१) भूमिका

वेदान्तस्य साधनानि विशिष्टक्रमेण विशिष्टनामभिश्च प्रकट्यन्ते। साधकः साधनेन किं फलं लभेत इति विषये तस्य स्पष्टता आवश्यकी। अतः एतस्य विषयस्य प्रकटनाय अनुबन्धा उपस्थाप्यन्ते। स्पष्टज्ञानेन यः कोऽपि मानवः पुरुषार्थलाभाय यतेत। यतो हि-

महता पुण्यपण्येन क्रीतेयं कायनौस्त्वया।
पारं दु:खोदधेर्गन्तुं तर यावन्न भिद्यते॥

मानवशरीरं बहुषु जन्मसु अर्जितेन महता पुण्येन लभ्यते। इदं शरीरं कायरूपिणी नौका। दुःखसागरं तर्तुं लब्धा। यावत् नौका न भिद्यते तावत् पारं गन्तव्यमिति अभिप्रायः श्लोकस्यास्य।

आदिनम् आजीवनं च जन्तुः कर्मरतः। तस्य कर्मणो वेदान्तदृष्ट्या विवेचनम् इष्टम्। तदेवात्र प्रस्तूयते।

२१.२) कर्माणि

कर्म अकृत्वा न कोऽपि क्षणमेकं जातु तिष्ठति। सर्वोऽपि जन्तुः कर्मरतः। कायिकमानसिकभेदेन कर्म द्वैविध्यं भजते। कामः कर्महेतुः प्रवर्तकत्वात्। अर्थान् कोऽपि कर्म कर्तुं प्रवर्तते, तथा प्रवृत्तिं प्रति को हेतुः। उच्यते कर्महेतुर्हि कामः। कुतः इति चेद् उच्यते यत् कामः प्रवर्तकः, प्रेरकः। अयं कामः कुतः जायते। यः अनात्मविद् तस्य कामः जायते। कुतः अनात्मविदः कामः जायते। यतो हि कामः अनात्मफलविषयः। कश्च विषयः। सुखं दुःखपरिहारश्च विषयः, तदुपायाश्च। अत एव तानि च कर्माणि शास्त्रतः जानन् शास्त्रानध्ययनात् अजानन् वा जन्तुः सुखलाभाय दुःखपरिहाराय च कर्माणि अनुतिष्ठति। सुखस्य कारणं धर्मः, धर्मस्य कारणं वेदादिविहितानि काम्यकर्माणि। दुःखस्य कारणम् अधर्मः। अधर्मस्य कारणं वेदादिभिः निषिद्धानि कर्माणि। यदपि कर्म क्रियते तस्य किमपि फलं सद्यः लभ्यते, किमपि फलम् कालेन अस्मिन् जन्मनि अग्रिमजन्मसु वा लभ्यते। अद्य समाप्तस्य कर्मणः कालान्तरेण फलं कथं स्यात्। तत्रोच्यते यत् सम्प्रति क्रियामाणं कर्म तस्य किमपि दृष्टं फलं सद्यः उत्पादयति, परन्तु तत् कर्म अन्तःकरणे कमपि विशिष्टं संस्कारम् उत्पादयति। अयं संस्कारः एव काम्यकर्मजन्यः चेत् धर्मः पुण्यम् इत्यादि आख्यायते। यदि संस्कारः निषिद्धकर्मजन्यः तर्हि स संस्कारः अधर्मः पापम् इत्यादि समाख्यायते। धर्मः अधर्मो वा फलदाने नियतौ स्तः। अर्थात् तयोः फलं भवति एव। एवञ्च फलोपभोगेन पुण्यापुण्ययोः शान्तिः भवति। यदि जातु निषिद्धं कर्म क्रियते, परन्तु तस्य अनिष्टं फलं न काम्यते तर्हि निषिद्धकर्मणः जायमानस्य पापस्य सद्यः नाशाय प्रायश्चितं कर्म क्रियते।

यदपि काम्यं निषिद्धं वा कर्म क्रियते तस्य अन्तःकरणे जातः संस्कारः अग्रे कदाचित् फलं दद्यात्। इत्थं बहुषु जन्मसु कृताः संस्काराः सन्ति। ते सर्वेऽपि **संचितं** कर्म कथ्यते। तेषु यत् कर्म परिपाकवशाद् फलं दातुम् प्रारभते तत् प्रारब्धं कथ्यते। एकस्य जन्मनः मृत्युं यावत् कारणस्वरूपं सुखदुःखात्मकफलदायकं च **प्रारब्धम्** कथ्यते। प्रारब्धं समाप्तं चेत् मृत्युः भवति। ततः परं संचितेषु कर्मसु यत् कर्म फलोन्मुखं भवति तद्वशात् पुनः जन्म भवति। तदा तत् संचितं फलम् दातुम् आरभते। अधुना तत् प्रारब्धं कथ्यते। प्रति जन्म मानवः यत् कर्म करोति तस्य धर्माधर्मरूपः संस्कारविशेषः भवति। प्रकृतजन्मनि यत् कर्म क्रियते तत् **क्रियमाणं** कथ्यते। इत्थम् एकस्मिन् जन्मनि प्रारब्धक्षयः भवति, नूतनसंचितस्य च उत्पत्तिः भवति। तत् संचितं परिपक्वं चेत् प्रारब्धत्वेन परिणमते। एतेन कारणेन जन्मनः जन्मान्तरं लभते जन्तुः। तत्र केवलं मनुष्यलोकः कर्मभूमिः वर्तते यत्र कर्म कृतं चेत् तस्य धर्माधर्मौ उत्पद्येते। पशुपक्षिणां तिर्यग्योनिः केवलं भोगयोनिः भवति। तत्र कृतस्य कर्मणः धर्माधर्मौ न भवतः। पूर्वजन्मसु कृतस्य कर्मणः फलोन्मुखयोः धर्माधर्मयोः फलोपभोगः एव भवति। तथैव महता

पुण्यप्रतापेन लब्धस्य देवशरीरस्यापि स्थितिः वर्तते। तत्रापि पूर्वकृतस्य पुण्यस्य फलोपभोगः भवति। यदा पुण्यक्षयः भवति तदा पुनः मर्त्यलोके जन्म भवति। तथाहि गीतं भगवता-

ते तं भुक्त्वा स्वर्गलोकं विशालं

क्षीणे पुण्ये मर्त्यलोकं विशन्ति। (गीता ९.२१)

अर्थात् - ये सोमपानेन पूतपापाः शुद्धकिल्बिषाः पुण्यफलम् आसाद्य सुरेन्द्रलोकं स्वर्गं गच्छन्ति ते तं स्वर्गलोकं विशालं विस्तीर्णं भुक्त्वा क्षीणे पुण्ये मर्त्यलोकं विशन्ति आविशन्ति।

कर्मफलत्वेन विविधाः लोकाः लभ्यन्ते इति श्रुतिस्मृतिषु बहुधा प्रतिपादितम्। एवं विविधैः कर्मभिः विविधा ये लोका लभ्यन्ते ते अस्मिन् श्लोके संक्षेपेण उक्ताः सन्ति-

शुभैराप्नोति देवत्वं निषिद्धैर्नारकीं तनुम्।

उभाभ्यां पुण्यपापाभ्यां मानुष्यं लभतेऽवशः॥ (नैष्कर्म्यसि.१.४१)

यावत् कश्चिदुपायः न क्रियते तावत् संचितं प्रारब्धत्वेन परिणमते। अतो जन्म भवति। तस्मिन् जन्मनि प्रारब्धनाशस्तु भवति परन्तु क्रियमाणं कर्म संचितत्वेन परिणमते। संचिते बहूनि कर्माणि भवन्ति। तेषु किमप्येकम् परिपक्वं चेत् प्रारब्धत्वेन परिणमते। इत्थं कर्मचक्रं चलति एव। कर्माणि फलदाने नियतानि सन्ति। अर्थात् कृतस्य कर्मणः फलं भवति एव यावत् तत्परिहारोपायो न कल्प्यते। कर्म इत्थं बलपूर्वकं जन्म कारयति। मृत्युं कारयति। सुखदुःखभोगं च कारयति। इदमेव बन्धनं यत् चक्रवत् जन्म मृत्युश्च प्रवर्तेते इति। इदं संसारचक्रं कथ्यते। अस्मादेव बन्धनात् त्राणं मोक्षः भवति।

पाठगतप्रश्नाः १

१. महता पुण्यपण्येन इत्यादिश्लोकम् उद्धृत्य सरलार्थं लिखत।

२. कर्मप्रवृत्तिकारणपरम्परां लिखत।

३. किम् अकृत्वा जन्तुः क्षणमेकमपि जातु न तिष्ठति।

(क) कर्म (ख) उपासना (ग) धर्मः (घ) प्रायश्चित्तम्

४. कर्महेतुः कः भवति।

(क) शरीरम् (ख) कामः (ग) प्रारब्धम् (घ) सञ्चितम्

५. सुखस्य कारणं किम्।

(क) धर्मः (ख) अधर्मः (ग) कर्म (घ) अज्ञानम्

६. काम्यकर्मजन्यः अन्तःकरणे कः संस्कारः भवति।

(क) धर्मः (ख) अधर्मः (ग) भयम् (घ) सुखम्

७. निषिद्धकर्मजन्यः अन्तःकरणे कः संस्कारः भवति।

(क) धर्मः (ख) अधर्मः (ग) भयम् (घ) सुखम्

८. संचितं किं भवति।

(क) पूर्वजन्मकृतं कर्म येन फलदानं न प्रारब्धम्। (ख) पूर्वजन्मकृतं कर्म येन फलदानं प्रारब्धम्। (ग) अस्मिन् जन्मनि कृतं कर्म (घ) अग्रिमजन्मसु करिष्यमाणं कर्म

९. स्वर्गलोकं गत्वापि पुनः मनुष्यादिदेहं लभते एव इत्यत्र प्रमाणं वचनं किम्।

२१.३) साधनायाः कारणं किम्

मानवान्तःकरणं त्रिदोषदुष्टम्। दोषत्रयं हि **मलः विक्षेपः आवरणं** चेति। मलवशात् अशुद्धं चित्तं विषयेषु आकृष्टं भवति। स एव चित्तस्य विक्षेपः। विक्षेपश्चेत् एकाग्रता न भवति। एकाग्रतायाः अभावे निदिध्यासनं सम्भवति। निदिध्यासनाभावे समाधिर्नास्ति। समाध्यभावे आवरणं न भिद्यते। अतो मोक्षो न भवति। अत एव मलनाशे विक्षेपनाशः विक्षेपनाशे आवरणनाशः सुकरो भवति।

चित्तमलः

कः चित्तस्य मलः। कथं चित्तं मलिनं भवति। चित्ते मलः अस्ति इति कथं ज्ञायते। चित्तमलस्य शुद्धिः कथं क्रियते। चित्तशुद्धिः जाता न वेति कथं ज्ञायते। चित्तं शुद्धं चेत् ततः परं किं कर्तव्यम्।

चित्तमलः पापम्। निषिद्धकर्माचरणेन पापं जायते, पापापन्नं चित्तं मलिनं भवति। निषिद्धकर्माचरणस्य वासनया चित्तमलः अनुमीयते। नित्यादिना निष्कामकर्मणा चित्तस्य शुद्धिः क्रियते। निषिद्धकर्माचरणस्य लाघवं भवति चेत् चित्तमलो न्यूनतां गत इति अनुमीयते। अयमेव विषयः अग्रे गीतासाहाय्येन सविस्तरं वक्ष्यते। चित्तं शुद्धं चेत् ततः परम् चित्तविक्षेपनाशाय उपासना कर्तव्या।

चित्तविक्षेपः

कः चित्तस्य विक्षेपः। कथं विक्षेपः जायते। चित्तं विक्षिप्तम् अस्ति इति कथं ज्ञायते। चित्तविक्षेपस्य शान्तिः कथं क्रियते। चित्तं शान्तं न वेति कथं ज्ञातव्यम्। चित्तशान्तेः परं किं कर्तव्यम्।

चित्तस्य चाञ्चल्यम् एव विक्षेपः, विषयान् प्रति चित्तस्य आकर्षणं विक्षेपः। मलिनं चित्तमस्ति चेत् भोग्यवस्तुनः आकर्षणं भवति। चित्ते विक्षेपः जायते। चित्तस्य चाञ्चल्यात् विक्षेपः अनुमीयते। उपासनया चित्तस्य शान्तिः अर्थात् एकाग्रता सम्पाद्यते। विक्षेपलाघवे चाञ्चल्यम् अल्पतां गच्छति।

चित्तं शान्तं न वेति ज्ञानार्थं - यथा दीपो निवतस्थो नेङ्गते, यथा वा तैलधारा अविच्छिन्ना पतति तद्वत् चित्तस्य उपास्ये ब्रह्मणि लग्नता चेत् चित्तं शान्तमति अनुमीयते।

अज्ञानावरणम्

किम् अज्ञानावरणम्। कथं जायते। कथं ज्ञायते यद् अज्ञानावरणम् अस्ति। आवरणभङ्गः कथं क्रियते।

अनात्मसु आत्मत्वबुद्धिः आवरणाद् भवति। अनात्मसु आत्मत्वबुद्धितः आवरणम् अनुमीयते। ब्रह्मज्ञानेन अज्ञाननाशः भवति।

२१.४) अनुबन्धाः

संस्कृतपरम्परासु सर्वत्र ग्रन्थकाराः चतुरः अनुबन्धान् प्रत्यक्षरूपेण परोक्षरूपेण वा ग्रन्थादौ उपस्थायन्ति। अधिकारी विषयः सम्बन्धः प्रयोजनम् इति चत्वारः अनुबन्धाः सन्ति। एषां समुदाय एव अनुबन्धचतुष्टयम् इति आख्यायते। ये अनु स्वज्ञानात् अनन्तरं बध्नन्ति, शास्त्रे ग्रन्थे वा आसज्जयन्ति प्रवर्तयन्ति प्रेरयन्ति ते अनुबन्धाः इति अनुबन्धशब्दस्य व्युत्पत्तिः। तथाहि लक्षणम्- ग्रन्थप्रवृत्तिप्रयोजकज्ञानविषयत्वम्। ग्रन्थे प्रवृत्तेः प्रयोजकं यद् ज्ञानं तस्य विषयः एव अनुबन्धः। यं विषयं जानन् ग्रन्थे प्रवर्तते स विषयः एव अनुबन्धः कथ्यते। अतो ग्रन्थादौ एते अनुबन्धाः उपन्यस्यन्ते। तथाहि परम्परा-

ज्ञातार्थं ज्ञातसम्बन्धं श्रोतुं श्रोता प्रवर्तते।

ग्रन्थादौ तेन वक्तव्यः सम्बन्धः सप्रयोजनः॥ (श्लोकवार्तिकम् १.१.१७)

सरलार्थः- श्रोता ज्ञाता ग्रन्थस्य अर्थं सम्बन्धं च ज्ञात्वा ग्रन्थाध्ययने प्रवर्तते। अतः ग्रन्थादौ विषयः सम्बन्धः प्रयोजनम् इत्येषाम् उल्लेखः नूनं कर्तव्यः।

अन्यच्चाहुः भट्टपादाः श्लोकवार्तिके-

सर्वस्यैव हि शास्त्रस्य कर्मणो वापि कस्यचित्।

यावत् प्रयोजनं नोक्तं तावत् तत् केन गृह्यते॥

प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते।

ते चानुबन्धाः अत्र श्लोकबद्धाः-

अधिकारी च विषयः सम्बन्धश्च प्रयोजनम्।

शास्त्रारम्भफलं प्राहुरनुबन्धचतुष्टयम् ॥६॥ (स.वे.सि.सा.संग्रहः)



अनुबन्धानां क्रमेऽपि अस्ति वा काचित् विशेषता। अधिकारि-विषय-सम्बन्ध-प्रयोजनानाम् अनुबन्धानां क्रमेण उपस्थितौ कोऽपि नियमः अस्ति। स उच्यते - शास्त्रस्य ज्ञातारं विना शास्त्रे प्रवृत्तिः नैव सम्भवति। तस्मात् शास्त्रस्य ज्ञातुः अधिकारिणः उल्लेखः प्रथमम् भवति। यद्यपि अधिकारिणः उपस्थितिः भवति, तथापि यं विषयं विशेषतः जिज्ञासति तस्य सामान्यज्ञानं तु अधिकरिणः स्यादेव। यतो हि विषयज्ञानहीनस्य अधिकारिणः शास्त्रे प्रवृत्तिः असम्भवा भवति। तस्मात् द्वितीयतः विषयस्य उल्लेखः। विषयेण सह शास्त्रस्य अथवा विषयेण सह पुरुषस्य सम्बन्धज्ञानम् आवश्यकम्। तस्मात्

सम्बन्धस्य तृतीये स्थाने उल्लेखः विद्यते। प्रयोजनस्य सर्वदा अन्तिमे अवस्थितिः। तस्मात् तस्य चतुर्थे स्थाने उल्लेखः विद्यते।

पाठगतप्रश्नाः २

१०. मानवान्तःकरणस्य दोषाः कति के च।

११. चित्तमलः कः। चित्तमलः कथं ज्ञायते।

१२. चित्तविक्षेपः कः। स च कथं ज्ञायते।

१३. अज्ञानावरणं किम्। तत् कथं ज्ञायते।

१४. चित्तमलनाशकं कर्म किम्।
(क) काम्यम् (ख) निषिद्धम् (ग) नित्यादिकम् (घ) श्रवणादिकम्

१५. चित्तविक्षेपनाशकं किम्।
(क) काम्यम् (ख) निषिद्धम् (ग) नित्यादिकम् (घ) उपासना

१६. अज्ञानावरणनाशः केनोपायेन भवति।
(क) काम्यकर्मणा (ख) निषिद्धेन (ग) नित्यादिना (घ) ब्रह्मज्ञानेन

१७. अनुबन्धाः कति के च।

२१.५) अधिकारी

न निरोधोन निरोधो न चोत्पत्तिर्न बद्धो न च साधकः।

न मुमुक्षुर्न वैमुक्त इत्येषा परमार्थता॥ (गौडपादीयकारिका २.३२)

आत्मा कदापि बद्धो नास्ति। यश्च बद्धो नास्ति, तस्य कुतो मोक्षो विचार्यते। बद्धश्चेत् मोक्षाय साधनानि कुर्यात्। बद्ध एव नास्ति। अतो न साधकः। बद्धस्यैव मुमुक्षा सम्भवति। अत आत्मा न मुमुक्षुरपि। आत्मनश्च निरोधो नास्ति, नापि उत्पत्तिः अस्ति। परमार्थत्वेन एषा स्थितिः अस्ति। तथापि यः चिन्तयति बद्धोऽस्मि इति स एव बद्धः अस्ति। स एव मोक्षाय यतेत यतते च। तस्यैव मोक्षलाभाय सन्नद्धता अस्ति न वेति ज्ञानाय विषयः प्रस्तूयते।

कः अधिकारी। अधिकारी अधिकृतः। सर्वत्र यो हि **अर्थी समर्थो विद्वान्** सः अधिकारित्वेन गण्यते। एवञ्च यथा अधिकारः तथा फलं तस्य भवेद्। यथा कस्यचिद् जनस्य सम्पत्तिः अस्ति। तत्सम्पत्तिलाभे कस्य अधिकारः, कः अधिकृतः, कः अधिकारी। यः तस्य जनस्य पुत्रः अस्ति स तत्र अधिकृतः। तद्वत् अत्र अधिकारी कः। ततः पूर्वम् इदं ज्ञातव्यम् यत् स कस्य अधिकारी। पुरुषः परमत्वेन यत् कामयते तत्र अधिकारी।

वेदान्तशास्त्रे पुरुषः परतमत्वेन मोक्षं कामयते। केचित् साक्षात् मोक्षं कामयन्ते केचित् दूरान्वयेन। अतो मोक्षे अधिकारी इति सिद्ध्यति। तद्यथा कश्चित् वाराणसीं गन्तुम् अधिकारी, योग्यः न वा इति मीमांस्यते। प्रथमन्तु तस्य वारणसीगमने इच्छा अस्ति न वा। यदि इच्छा अस्ति तर्हि गमनस्य मार्गव्ययाय पर्याप्तं धनम् अस्ति न वा। यदि धनमस्ति तर्हि गमनाय योग्यः, सः अधिकारी। एतावता स वाराणसीं न प्राप्तः। ततः परं तेन गन्तव्यमस्ति। तद्वदेवेहापि **यः साङ्गं वेदान् अधीतवान्, अखिलवेदार्थम् आपाततः जानाति, यस्य चित्तं शुद्धम् एकाग्रं चास्ति, यस्य मोक्षेच्छा अस्ति, यस्य साधनचतुष्टयसम्पत्तिः अस्ति स मोक्षस्य साधनाय अधिकारी इति गण्यते**। एतावता तस्य मोक्षः न सिद्धः। इतोऽपि साधनानि अनुष्ठेयानि सन्ति। अत इतः परं तेन मोक्षलाभाय गुरुसमीपं गन्तव्यम्। श्रवणादिकं कर्तव्यम्। इत्थम् अत्र अधिकारी इति पदेन **वेदार्थविद् निर्मलचित्तः एकाग्रचित्तः साधनचतुष्टयसम्पन्नः** एव गृह्यते।



एवञ्च गुरुः कस्मै शिष्याय ब्रह्मविद्यां दद्याद् इति अधः श्लोके सनिबद्धमस्ति। तेनापि ज्ञायते यत् ईदृशाय एव शिष्याय ब्रह्मविद्या दीयते। अर्थात् एवंगुणविशिष्टः अधिकारित्वेन गण्यते इति। तथाहि-

प्रशान्तचित्ताय जितेन्द्रियाय
प्रहीणदोषाय यथोक्तकारिणे।
गुणान्वितायानुगताय सर्वदा
प्रदेयमेतत् सततं मुमुक्षवे॥

सरलार्थः- प्रशान्तचित्ताय- प्रशान्तं चित्तं यस्य स प्रशान्तचित्तः। तस्मै। अनेन शमगुणयुक्त उक्तः। जितेन्द्रियाय- जितानि इन्द्रियाणि येन स जितेन्द्रियः। तस्मै। अनेन दमगुणयुक्त उक्तः। दोषाः रागादयः। ते च पापप्रभवाः। ते प्रहीणाः यस्य स प्रहीणदोषः। तस्मै। अनेन यस्य चित्तं शुद्धं स उक्तः। यथा उक्तं शास्त्रेण गुरुणा च तथा करोति स यथोक्तकारी। तस्मै। अनेन काम्यनिषिद्धवर्जनपुरःसरं नित्याद्यनुष्ठानेन ईश्वरप्रीतिः येन लब्धा स उक्तः। गुणा विवेकवैराग्योपरतितितिक्षासमाधानानि। तैः अन्वितः गुणान्वितः। तस्मै। अनुगताय गुरुसेवापराय। अनेन श्रद्धा उक्ता। श्रद्धालुः खलु अनुगतः गुरुसेवापरो भवति।

अधिकारी कस्य

कस्य अधिकारी इति प्रश्न उदेति। अर्थाद् अधिकारिणः अधिकारः कुत्र, कस्मिन् विषय इति। इदं तु स्पष्टमेव यद् ग्रन्थे यत् प्रयोजनम् उच्यते तत्प्रयोजनलाभाय खलु अधिकारी ग्रन्थम् अधीते,

तदुक्तानि साधनानि चानुतिष्ठति। अतः प्रतिपाद्यमानस्य फलस्य लाभे अधिकारी इति सुस्पष्टम्। वेदान्तस्य यत् मोक्षाख्यं प्रयोजनम् अस्ति तस्य लाभस्य एव अधिकारी वेदान्तग्रन्थेषु उच्यते। केवलं ग्रन्थं यः कोऽपि पठेत्। शाब्दिकम् अर्थमपि जानीयात्। तत्रापि काचित् योग्यता आवश्यकी। तथापि स यदि वेदान्ताधिकारिणि आवश्यकैः प्रोक्तलक्षणैः सम्पन्नः न स्यात् तर्हि प्रोक्तं फलं न लभेत। तस्माद् ग्रन्थाध्ययने अधिकारी यद्यपि उच्यते तथापि स प्रतिपाद्यमानस्य प्रयोजनस्य लाभाय अधिकारी इत्येव अभ्युपगन्तव्यम्। अन्यथा शान्तो दान्त उपरतस्तितिक्षुः इत्यादिगुणसम्पन्नः वेदान्तसारादिग्रन्थाध्ययने अधिकारी इति आपत्तिः स्यात्। नास्तिका अपि ग्रन्थममुं पठन्ति।

वेदान्तसारग्रन्थे अधिकारिणः स्वरूपम् उच्यते -

अधिकारी तु विधिवदधीतवेदवेदाङ्गत्वेन आपाततोऽधिगताखिलवेदार्थोऽस्मिन् जन्मनि जन्मान्तरे वा काम्यनिषिद्धवर्जनपुरःसरं नित्यनैमित्तिकप्रायश्चित्तोपासनानुष्ठानेन निर्गतनिखिलकल्मषतया नितान्तनिर्मलस्वान्तः साधनचतुष्टयसम्पन्नः प्रमाता इति।

सरलार्थः - यः लौकिकवैदिकव्यवहारेषु अभ्रान्तो यो जीवः स एव प्रमाता। **स्वाध्यायोऽध्येतव्यः** इति श्रुतिवचनात् यः वेदान् साङ्गान् विध्यनुसारेण अधीत्य संशयाविरोधिनिश्चयरूपेण च समग्रं वेदार्थं जानाति। अन्यथा कर्तव्यत्वेन वर्जनीयत्वेन च उपदिष्टानां ज्ञानं कुतः स्यात्। यः काम्यानां निषिद्धानां च कर्मणां त्यागं करोति। नित्यानां नैमित्तिकानां प्रायश्चितानां च कर्मणाम् अनुष्ठानेन यस्य धर्माधर्मरूपाणि निखिलानि कल्मषाणि निर्गतानि। कल्मषापगमात् यस्य अन्तःकरणं नितान्तं निर्मलम् अस्ति। उपासनायाः अनुष्ठानेन च यस्य चित्तं विक्षेपरहितम् एकाग्रम् समाहितम् अस्ति। यश्च साधनचतुष्टयसम्पन्नः अस्ति। स एव अत्र अधिकारित्वेन गण्यते। यः प्रमाता सः अधिकारी इति अन्वयः।

अस्य सविस्तरम् आलोचनम् अग्रे उपस्थाप्यते। अत्रोक्ता एव विषया इतः परं प्रतिपादनीयाः सन्ति। तथापि प्रसक्तानुप्रसक्ता अन्येऽपि केचिद् विषया उपन्यस्यन्ते। बहुत्र विषयस्य दृढत्वसम्पादनाय श्रुतिस्मृतिवचनानि उपस्थापयिष्यन्ते। बहुत्र भगवतो भाष्यकारस्य आचार्यस्य शङ्करस्य वचनानि, व्याख्यानानि च उपोद्बलकत्वेन प्रदास्यन्ते।

अधिकारिणो लक्षणे उक्तानाम् कर्मणाम् उपासनानां च एतेषाम् अनुष्ठानं तदैव सम्भवति यदा प्रमाता ऋक्-साम-यजुरथर्वणां चतुर्णां वेदानाम् अर्थं सामान्येन जानीयात्। वेदानाम् अर्थज्ञानं वेदाङ्गज्ञानपूर्वकमेव सम्भवति। व्याकरणं निरुक्तं ज्योतिषं शिक्षा कल्पः छन्दः च इति षड् वेदाङ्गानि। षड्विधैः वेदाङ्गैः सह एव वेदानां सम्यक् अर्थज्ञानं सम्भवति नान्यथा। अतो वेदानाम् अर्थस्य परिज्ञानाय विधिपूर्वकं षडङ्गसहितं वेदाध्ययनम् आवश्यकम्। अतो लक्षणे "विधिवदधीतवेदवेदाङ्गत्वेन" इति उक्तम्। साम्प्रतिके काले केचिद् भ्रान्त्या विधिं हित्वा येन केनापि क्रमेण कांश्चिद् ग्रन्थान् इतस्ततः पठन्ति। अतो वेदान्तोक्तफलं न लभन्ते। तेन ते वीतश्रद्धा भवन्ति। परन्तु अत्र शास्त्रस्य को दोषः। अतो विधिवदेव वेदवेदाङ्गाध्ययनं कर्तव्यम्। तदा स सम्प्रदायविद् भवेद्।

अत्र प्रश्नः भवति यत् वेदेषु एव वेदान्तस्य अन्तर्भावः। यदि वेदाङ्गसहितं विधिम् अनुसृत्य वेदाध्ययनं भवति तर्हि प्रमाता वेदपाठकाले एव वेदान्ततत्त्वं जानाति। तस्मात् पृथक्तया वेदान्तशास्त्रस्य ज्ञानाय योग्यता न अर्जनीया, नापि गुरुसमीपं गत्वा श्रवणादिकं कर्तव्यम् इति। अत एव अस्य प्रश्नस्य प्रशमनाय लक्षणे आपाततः इति पदस्य प्रयोगः। आपाततः इत्यस्य प्राथमिकतया इत्यर्थः। यः प्राथमिकतया वेदार्थं जानाति परन्तु वेदान्ततात्पर्यं न जानाति तादृशः प्रमाता अत्र अधिकारी। तथाहि संशयाविरोधिनिश्चयात्मकं ज्ञानं विधिवद्वेदाध्ययनेन सम्पादनीयम्। किमिदं संशयाविरोधिनिश्चयात्मकं ज्ञानम्। यदि निश्चयः स्यात् संशयो निवर्तते। कथं संशयोऽपि अस्ति, निश्चयोऽप्यस्ति। प्राथमिकवेदाध्ययनेन यो निश्चयो जायते तेन असम्भावना विपरीतभावना इति संशयविपर्ययौ न निवर्तते। संशयविपर्यययोः सत्त्वे ब्रह्मज्ञानं नोदेति। एतयोः नाशाय अधिकारी श्रवणमनननिदिध्यासनानि कुर्यात्। वेदान् अधीत्य काम्यादीनां त्यागम् नित्यादीनाम् अनुष्ठानं च कृत्वा चित्तं शुद्धम् एकाग्रं च भवति चेत् संशयविपर्यययोः निवृत्तिः सम्भवति। परन्तु यदा प्राथमिकतया वेदान् पठति तदा तु वेदाध्ययनाधिकारो यद्यपि स्यात् तथापि मोक्षाधिकारो नास्ति। इत्थं संशयविपर्ययाभ्यां प्रतिबद्धं निश्चयात्मकं ज्ञानम् अत्र आपाततः वेदार्थज्ञानमिति मन्तव्यम्।

विधिपूर्वकं वेदाध्ययनम्, वेदार्थज्ञानम्, काम्यनिषिद्धकर्मणोः परित्यागः, नित्यनैमित्तिकप्रायश्चित्तोपासनानाम् अनुष्ठानम् च इत्यादिकर्माणि पूर्वजन्मसु कृतानि चेदपि तेभ्यः फलं लभ्यते। ये पूर्वजन्मसु एतत्कर्मादिकं साधितवन्तः तेषां कृते प्रकृतजन्मनि नित्यादिकर्मणाम् आवश्यकता नास्ति। अत्र प्रमाणं हि - जगति केचन विदुरधर्मव्याधादयः पुरुषाः समभूवन् ये द्विजकुलेषु न उत्पन्नाः अपि तु अन्यकुले उत्पन्नाः। तेषां पूर्वजन्मनि सम्पादितेन नित्यादिकर्मणा चित्तं शुद्धम् अस्ति। अतः तेषु ज्ञानोदयः दृश्यते। ते अस्मिन् जन्मनि यद्यपि वेदाध्ययनं वैदिककर्मानुष्ठानं वा न कृतवन्तः तथापि तद् विनापि वेदान्ते अधिकारिणः भवन्ति। अनेके महापुरुषाः एकस्मिन् एव जन्मनि विधिपूर्वकवेदाध्ययनेन नित्यादिकर्मानुष्ठानेन वेदान्ते अधिकारलाभाय यतन्ते। परन्तु साधारणजनाः बहुषु जन्मसु कृतेन तपस्याबलेन अधिकारिणः भवन्ति। भगवान् श्रीकृष्णः गीतायाम् उक्तवान् यत् -

प्रयत्नाद्यतमानस्तु योगी संशुद्धकिल्बिषः।

अनेकजन्मसंसिद्धस्ततो याति परां गतिम्॥ (भ.गी.६.४५)

सरलार्थः- संशुद्धकिल्बिषः विनष्टपापः यस्य सर्वाणि पापानि विनष्टानि तादृशः पुरुषः। प्रयत्नात् - बहुयत्नेन। यतमानः प्रवर्तमानः, कार्ये लग्नः इत्यर्थः। योगी योगवान् पुरुषः। तु। अनेकजन्मसंसिद्धः नानाजन्मसु परिशुद्धः। ततः तस्मात् अनन्तरम् पराम् प्रकृष्टाम् गतिं स्थानम् याति गच्छति प्राप्नोति इति।

अर्थात् यः पुरुषः विधिम् अनुसृत्य शास्त्रोक्तकर्माणि आचरति, तस्य सर्वाणि पापानि विनश्यन्ति। एवं बहुषु जन्मसु क्रमेण शुद्धो भूत्वा मुक्तिरूपां परमां गतिं प्राप्नोति इति भावार्थः।

विद्यारण्यमुनिः पञ्चदश्याम् अपि उक्तवान्-

कुर्वते कर्म भोगाय कर्म कर्तुं च भुञ्जते।

नद्यां कीटा इवावर्तादावर्तान्तरमाशु ते॥

व्रजन्तो जन्मनो जन्म लभन्ते नैव निर्वृतिम्॥ (प.द.१.३०)

सरलार्थः- भोगाय सुखदुःखानाम् अनुभवाय, मनुष्यादिशरीराणि अधिष्ठाय कर्म पुण्यजनकानि पापजनकानि च कर्माणि कुर्वते। पुनः कर्म कर्तुं पूर्वकृतस्य कर्मणः फलं भुञ्जते, फलस्य भोगं कुर्वन्ति। यावत् पूर्वकृतस्य फलस्य उपभोगेन लयो न भवति, तावत् नूतनतया कर्म कर्तुं न शक्यते। अतः पुनः कर्माणि कर्तुं फलानि भञ्जते इति भावः। यथा आवर्ते पतिताः कीटाः आवर्तात् आवर्तान्तरं गच्छन्ति तथैव जीवाः जन्मनः जन्मान्तरं लभन्ते। निर्वृतिं सुखं न लभन्ते। एवं बहु जन्मनः परं कदाचित् उद्बोधः सम्भवति -

"सत्कर्मपरिपाकात् ते करुणानिधिनोद्धृताः।

प्राप्य तीरतरुच्छायां विश्राम्यन्ति यथासुखम्॥" इति। (१/३१)

सरलार्थः- ते कीटाः सत्कर्मपरिपाकात् करुणानिधिना परमकृपालुना केनचित् पुरुषविशेषेण उद्धृताः रक्षिताः जलप्रवाहतीरे तरुच्छायां प्राप्य तत्र यथा विश्राम्यन्ति, तथैव जीवाः संसारावर्ते बहु जन्म यापयित्वा सत्कर्मपरिपाकात् करुणानिधिना परमकृपालुना गुरुणा उद्धृताः सन्तः रक्षिताः भवन्ति। अत आत्मनः शुद्ध्यर्थं बहु जन्म आवश्यकम् इति प्रमाणितम्। तस्मात् अधिकारिणो लक्षणे वेदान्तसारस्थे "अस्मिन् जन्मनि जन्मान्तरे वा" इति उक्तम्। एवम् अधिकारिलक्षणं सामान्यरूपेण प्रदर्शितम्। इदानीं तस्य विस्तारः आवश्यकः।

एतत् सिद्धं यत् विधिवत् वेदाङ्गसहितं वेदाध्ययनं कर्तव्यं, तत् एकस्मिन् एव जन्मनि अथवा बहुषु जन्मसु भवतु। विधिवत् अध्ययनम् इत्यस्य अर्थः त्रैवर्णिकानां ब्राह्मण-क्षत्रिय-वैश्यानाम् उपनयनसंस्कारः कर्तव्यः। ततः गुरुगृहं गन्तव्यम्। तत्र स्थित्वा ब्रह्मचर्यं पालयित्वा वेदाङ्गैः सहितं वेदानाम् अध्ययनम् एव विधिवत् अध्ययनम्। वेदान्ततत्त्वज्ञानाय वेदानाम् आपाततः अर्थज्ञानम् आवश्यकम्। वेदानाम् अर्थज्ञानेन कर्तव्यत्वाकर्तव्यत्वविवेकः स्यात्। वेदाध्ययनाय गुरुगृहगमनं वेदान्तश्रवणाय च गुरुसमीपगमनम् इति द्विविधं गुरुगृहगमनम् इति उक्तप्रायं भवति।

२१.५.१) वेदान्तोक्तमार्ग एव कुतोऽनुसर्तव्यः अधिकारिणा

निरुपाधिद्वेषविषयीभूता चित्तवृत्तिः दुःखम्। दुःखं च चित्तधर्मः। तच्च बुद्धितत्त्वस्य परिणामविशेषः। रजसः कार्यं तद्। दुःखं त्रिविधम्। आध्यात्मिकम् आधिभौतिकम् आधिदैविकं च। तत्रापि आध्यात्मिकं द्विविधं शारीरं मानसं च। तत्र शारीरं वातपित्तश्लेष्मणां वैषम्यनिमित्तम्। मानसं तु कामक्रोधलोभमोहभयेर्ष्याविषयविशेषादर्शननिबन्धनम्। सर्वं चैतद् आन्तरोपायसाध्यत्वाद् आध्यात्मिकं दुःखम्। बाह्योपायसाध्यं च दुःखं द्वेधा - आधिभौतिकम् आधिदैविकं च। तत्र आधिभौतिकं मानुषपशुपक्षिसरीसृपस्थावरनिमित्तम्। आधिदैविकं यक्षराक्षसविनायकग्रहावेशनिबन्धनं चेति।

त्रिविधं दुःखम्। तस्य निवृत्तिः विभिन्नैः उपायैः सम्भवति। त्रिविधदुःखनाशं को वा न वाञ्छति। औषधादिना रोगजदुःखनिवृत्तिः। भोजनादिना क्षुधादिजनितदुःखनिवृत्तिः। शस्त्रास्त्रादिना

चौरव्याघ्रादिजभयनिवृत्तिः। तन्त्रमन्त्रप्रयोगेण च प्रेतपिशाचादिजदुःखनिवृत्तिः। इत्थं सन्ति नैके उपायाः। सत्सु च एतेषु को वेदान्तेन दुःखनाशे प्रवर्तेत। वेदान्तमते तु अविद्या तत्कार्यं जगत् इति अनयोः निवृत्तिः यदा भवति तदैव वस्तुतः दुःखनिवृत्तिः भवति। परन्तु प्रकारान्तेषु सत्सु वेदान्तोक्तोपायैरेव दुःखनिवृत्तिः कुत इति जिज्ञासा उदेति। इदं तु सत्यं यद् औषधादिना दुःखनिवृत्तिः सम्भवति। परन्तु आत्यन्तिकनिवृत्तिः न भवति। अर्थात् तथा निवृत्तिः यतः परं पुनः दुःखोत्पत्तिः न भवति सा आत्यन्तिकनिवृत्तिः। आत्मज्ञानं विना आत्यन्तिकनिवृत्तिः न सम्भवति। औषधादिभिः यद्यपि दुःखनिवृत्तिः भवति तथापि एकान्ततया न भवति। अर्थात् एते उपाया एकान्ता न सन्ति। एकान्त इत्यस्यार्थः निश्चयेन फलदायकः। वेदान्तेन दुःखनिवृत्तिः निश्चयेन भवति। अतः वेदान्तः एकान्तोपायः। अत एव वेदान्तोक्तमार्ग एव अनसरणीय इति सिद्धान्तः।

पाठगतप्रश्नाः ३

१८. वेदान्तस्य अधिकारिणः कुत्राधिकारः।

(क) ग्रन्थाध्ययने (ख) वेदान्तश्रवणे (ग) नित्यादिकरणे (घ) मोक्षलाभे

१९. वेदान्तशास्त्रे पुरुषः परमत्वेन किं कामयते।

(क) स्वर्गम् (ख) मोक्षम् (ग) बन्धनम् (घ) दुःखनाशम्

२०. वेदान्तोक्तप्रयोजनलाभे कोऽधिकारी।

२१. वेदान्तसारोक्ते अधिकारिलक्षणे आपातपतः इत्यनेन किं बोध्यम्

२२. नित्यादिकर्माणि प्रति जन्म कर्तव्यानि न वेति प्रस्तूयताम्।

पाठसारः

अस्मिन् पाठे साधनायाः उपक्रमः कृतः। नरजन्म दुर्लभम् बहुपुण्यसाध्यत्वात्। अथः लब्धं मानवजीवनं कथं सर्वोच्चपुरुषार्थलाभाय व्ययीकर्तव्यम् इति विषयो भूमिकायां प्रकटितः। जन्मनः मृत्युं यावत् शारीरं मानसं कर्म कुर्वाणो मानवः तत्फलं तु लभते एव। अतः कर्मणां परिणामः धर्मः अधर्मः चित्तशुद्धिः इति त्रिविधः। संचितं प्रारब्धं क्रियमाणं चेति त्रेधा विभागोऽपि व्यवसितः। वेदादिशास्त्रतः ज्ञायमानः स्वर्गादिः अनित्यः कर्मजन्यत्वात् इत्यत्र श्रुतिस्मृतिवचनानि प्रमाणत्वेन सन्ति।

मलः विक्षेपः अज्ञानावरणं चेति त्रिदोषदुष्टत्वात् तद्दोषनाशाय साधना उपदिश्यते। निष्कामकर्मयोगेन मलनाशः। उपासनया विक्षेपक्षयः। ब्रह्मज्ञानेन अज्ञानावरणनिवृत्तिः इति सुव्यस्थापितम्।

यस्य ज्ञानं भवति चेत् पुरुषः प्रवर्तते सः अनुबन्धः इति स्थितिः। वेदान्तस्य अधिकारि-विषय-सम्बन्ध-प्रयोजनभेदात् चत्वारोऽनुबन्धाः।

अधिकारी इति महान् विषयो वर्तते। मुख्यत्वेन वेदार्थविद् निर्मलचित्तः एकाग्रचित्तः साधनचतुष्टयसम्पन्नः अधिकारी गण्यते। एते एव विषयाः क्रमशः प्रतिपादिताः सन्ति। एतेषु अस्मिन् पाठे सामान्यम् आलोचनं विहितम्। अग्रिमे पाठे अयमेव विषयः अनुवर्तते।

पाठान्तप्रश्नाः

१. संचितं किमुच्यते। प्रारब्धं वा किम्।
२. कर्मबन्धनं विवृणुत।
३. कर्मभोगयोनिपरिचयं दद्यात्।
४. मानवान्तःकरणस्य त्रीन् दोषान् परिचाययत।
५. चित्तमलो मीमांस्यताम्।
६. चित्तविक्षेपो मीमांस्यताम्।
७. अनुबन्धार्थः विव्रियताम्।
८. वेदान्तसारे अधिकारिलक्षणं किमुक्तम्।
९. अधिकारी कुत्र इति विचार्यताम्।
१०. अनेकजन्मसु साधनानुष्ठानेन कीदृशो जनः अधिकारी भवति इति विव्रियताम्।
११. वेदान्तोक्तमार्ग एव कुतोऽनुसर्तव्यः अधिकारिणा।

पाठगतप्रश्नानाम् उत्तराणि

उत्तराणि-१

१. महता पुण्यपण्येन क्रीतेयं कायनौस्त्वया।
पारं दुःखोदधेर्गन्तुं तर यावन्न भिद्यते॥
सरलार्थः- मानवशरीरं बहुषु जन्मसु अर्जितेन महता पुण्येन लभ्यते। इदं शरीरं कायरूपिणी नौका। दुःखसागरं तर्तुं लब्धा। यावत् नौका न भिद्यते तावत् पारं गन्तव्यमिति अभिप्रायः श्लोकस्यास्य।

२. यः अनात्मविद् भवति तस्य कामः जायते। कामो हि अनात्मफलविषयः। कामः प्रेरकः प्रवर्तकः अस्ति। अतः कामः कर्मणि प्रवृत्तिं जनयति।

३. (क)

४. (ख)

५. (क)

६. (क)

७. (ख)

८. (क)

९. ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशन्ति। (गीता ९.२१)

उत्तराणि-२

१०. मानवान्तःकरणं त्रिदोषदुष्टम्। दोषत्रयं हि मलः विक्षेपः आवरणं चेति।

११. चित्तमलः पापम्। निषिद्धकर्माचरणस्य वासनया चित्तमलः अनुमीयते।

१२. चित्तस्य चाञ्चल्यम् एव विक्षेपः, विषयान् प्रति चित्तस्य आकर्षणं विक्षेपः। चित्तस्य चाञ्चल्यात् विक्षेपः अनुमीयते।

१३. अनात्मसु आत्मत्वबुद्धिः आवरणाद् भवति। अनात्मसु आत्मत्वबुद्धितः आवरणम् अनुमीयते।

१४. (ग)

१५. (घ)

१६. (घ)

१७. अधिकारी विषयः सम्बन्धः प्रयोजनम् इति चत्वारः अनुबन्धाः सन्ति।

उत्तराणि-३

१८. (घ)

१९. (ख)

२०. वेदार्थविद् निर्मलचित्तः एकाग्रचित्तः साधनचतुष्टयसम्पन्नः वेदान्तोक्तप्रयोजनलाभे अधिकारी।

२१. वेदान्तसारोक्ते अधिकारिलक्षणे आपापतः इत्यनेन इत्यस्यार्थस्तावत् तथा शाब्दिकं ज्ञानं येन संशयो निवर्तते परन्तु आत्मज्ञानस्य प्रतिबन्धिका असम्भावना विपरीतभावना च न विवर्तते इति।

२२. विधिपूर्वकं वेदाध्ययनम्, वेदार्थज्ञानम्, काम्यनिषिद्धकर्मणोः परित्यागः, नित्यनैमित्तिकप्रायश्चित्तोपासनानाम् अनुष्ठानम् च इत्यादिकर्माणि पूर्वजन्मसु कृतानि चेदपि तेभ्यः फलं लभ्यते। ये पूर्वजन्मसु एतत्कर्मादिकं साधितवन्तः तेषां कृते प्रकृतजन्मनि नित्यादिकर्मणाम् आवश्यकता नास्ति।

॥ इति एकविंशः पाठः ॥